न चैतद्विद्मः कतरन्नो गरीयः यद्वा जयेम यदि वा नो जयेयुः।
यानेव हत्वा न जिजीविषामः तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः।। २.६

na caitadvidmaḥ kataranno garīyoyadvā jayema yadi vā no jayeyuḥ ।
yāneva hatvā na jijīviṣāmas-te'vasthitāḥ pramukhe dhārtarāṣṭrāḥ ।।2.6

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्।।२.७

kārpaṇyadoṣopahatasvabhāvaḥ pruccāmi tvām dharmasammūḍhacetāḥ ।
yaccreyaḥ syānniścitam brūhi tanme śiṣyaste'haṁ śādhi māṁ tvāṁ prapannam ।।2.7

न हि प्रपश्यामि ममापनुद्याद्–यच्छोकमुच्छोषणमिन्द्रियाणाम्।
अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम्।।२.८

na hi prapaśyāmi mamāpanudyād yacchokamucchoṣaṇamindriyāṇām ।
avāpya bhūmāvasapatnamruddhaṁ-rājyam surāṇāmapi cādhipatyam ।।2.8

संजय उवाच । sanjaya uvāca ।

एवमुक्त्वा हृषीकेशं गुडाकेशः परंतपः।
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह।।२.९

evamuktvā hriṣīkeśaṁ guḍākeśaḥ parantapa ।
na yotsya iti govindamuktvā tūṣṇīṁ babhūva ha ।।2.9

तमुवाच हृषीकेशः प्रहसन्निव भारत।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः।।२.१०

tamuvāca hriṣīkeśaḥ prahasanniva bhārata ।
senayorubhayormadhye viṣīdantamidaṁ vacaḥ ।।2.10